SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-4, (Oct-Dec) 2025

# शक्तिनिर्णायकेषु सामर्थ्यमाश्रित्य शाब्दिकसिद्धान्ताः

**Suman Das**
Ph.d. Research Scholar
Ramakrishna Mission Vidyamandira,
Belur Math, Howrah, West Bengal, India
Email: suman28das@gmail.com

**Abstract:** अर्थावगत्यर्थः शब्दप्रयोगः क्रियते। केचन एकार्थकाः केचन अनेकार्थकाश्च शब्दाः प्राप्यन्ते। अनेकार्थकशब्दस्थले कदा कोऽर्थ आश्रयणीय इति निर्णयः कथं कर्तुं शक्यत इति शास्त्रकृद्भिः शक्तिनियन्त्रकाः केचन स्वीकृताः येन नानार्थकशब्दानां स्थलविशेषे अर्थविशेषस्यैव नियन्त्रणं कर्तुं शक्यते। संयोगादिनिर्णायकेषु सामर्थ्यमेकं निर्णायकम्। सामर्थ्यरूपं शक्तिनियन्त्रकं समाश्रित्य पाणिनिव्याकरणे परिलक्षितेषु स्थलेषु कानिचन स्थलानीह शोधपत्रे यथामति आलोच्यन्ते। तानि— प्रथमानिर्दिष्टं समास उपसर्जनं, तुल्यास्यप्रयत्नं सवर्णम्, अदर्शनं लोपः, तस्य लोपः, संयोगे गुरुः, अपवर्गे तृतीया, साधकतमं करणं, अधीगर्थदयेशां कर्मणि, यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी, कृत्तद्धितसमासाश्च चेत्यादीनि स्थलानि शास्त्रमनतिक्रम्य यथामति आलोचयामि।

**Keywords:** शक्तिनिर्णायकः, सामर्थ्यम्, अदर्शनं, गुरु, साधकतमम्।

सकलव्यवहारसहायकः खलु शब्द इत्यत्र नास्ति विप्रतिपत्तिः। उच्यते भर्तृहरिणा—

''न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।''[1] इति।

शब्दप्रयोगोऽर्थावगत्यर्थः। शब्दाः खलु केचन एकार्थकाः केचन च अनेकार्थकाः। अनेकार्थकशब्दश्रवणेन सर्वेषामर्थानामुपस्थितिर्भवति। किन्तु एकस्मिन् स्थले एकेनैव अर्थेन कार्यं विधीयते, न तु एकाधिकेनार्थेन। तर्हि अनेकार्थकस्थले कदा कोऽर्थ आश्रयणीय इति निर्णयः कथं कर्तुं शक्यते? यथा सैन्धवमानय इति स्थले सैन्धवशब्दं श्रुत्वा लवणरूपार्थस्य अश्वरूपार्थस्य च उपस्थितिर्भवति। तर्हि सैन्धवमानय इत्युक्ते अवश्यं संशयो जायते अत्र कस्य अर्थस्य ग्रहणं भवति। अस्य संशयस्य निराकरणाय शास्त्रकृद्भिः शक्तिनियन्त्रकाः केचन स्वीकृताः येन नानार्थकशब्दानां स्थलविशेषे अर्थविशेषस्यैव नियन्त्रणं कर्तुं शक्यते। के खलु शक्तिनियन्त्रका इति विषये भर्तृहरिणा वाक्यपदीये उच्यते—

''संसर्गो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः।।
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।।''[2] इति।

कारिकास्थे स्वरादिपदे आदिपदेन षत्वसत्वनत्वणत्वादीनां ग्रहणम्। एते संयोगादयः शब्दार्थस्यानवच्छेदे सन्देहे तदपाकरणद्वारेण निर्णयहेतवः। वाक्य-संसर्ग-विप्रयोग-साहचर्य-विरोधिता-अर्थ-प्रकरण-लिङ्ग-शब्दान्तरस्य सन्निधि-सामर्थ्य-औचिति-देश-काल-व्यक्ति-स्वर-षत्व-सत्व-णत्व-

नत्वादयः इति साकल्येन ऊनविंशतिः निर्णयकाः प्राप्यन्ते। एतेषु सामर्थ्यमिति आलोचनाविषयः। सामर्थ्यं नियतशक्तिः निर्दिष्टजननशक्तिः करणत्वं वा। इदानीं सामर्थ्यमाश्रित्य केचन शब्दशास्त्रीयसिद्धान्ताः प्रस्तूयन्ते—

**क)** 'प्रथमानिर्दिष्टं समास उपसर्जनम्' (पा.सू. १.२.४३) इत्यत्र सन्देहो जातः समासपदार्थविषये। किं विग्रहोऽत्र समासपदार्थः आहोस्विद् लक्षणागम्यं समासशास्त्रम्। विग्रहः समासपदार्थश्चेत्सूत्रार्थो भवति— विग्रहे यत्प्रथमानिर्दिष्टं तस्य उपसर्जनं स्यात्। समासशास्त्रं समासपदार्थश्चेत्सूत्रार्थो भवति— समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनं स्यात्। विग्रहः समासपदार्थश्चेत् 'राज्ञः पुरुषः' इत्यत्र पुरुषपदस्य पूर्वनिपातः, पुरुषपदस्य विग्रहे प्रथमानिर्दिष्टत्वात्, एतत्तु अनभीष्टम्। अतः प्रयोगसामर्थ्यात्समासपदं समासशास्त्रपरं, न तु विग्रहपरम्। अधिहरि अधिगोपम् इत्यादिप्रयोगाः अप्यत्र सामर्थ्यरूपेण आगच्छन्ति। यतः एतेषां प्रयोगानां विग्रहे प्रथमान्तपदाभावोऽस्ति, प्रथमान्तपदाभावादेतेषां प्रयोगानाम् अनुत्पत्तिः, अनुत्पत्तेः सामर्थ्यात्समासपदं समासशास्त्रपरम्। अतो वृत्तौ दीक्षित आह- ''समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनं स्यात्''[3] इति। समासशास्त्रमिति समासपदार्थश्चेन्न काचिदभीष्टहानिः। 'प्रथमानिर्दिष्टं समास उपसर्जनम्' (पा.सू. १.२.४३) इति सूत्रे समासपदार्थनिर्णायकः खलु सामर्थ्यम्।

**ख)** एदैतोरोदौतोश्च न मिथः सावर्ण्यमिति कथम्? सवर्णसंज्ञाविधायकं सूत्रन्तु 'तुल्यास्यप्रयत्नं सवर्णम्' (पा.सू.१.१.९) इति। अनेन सूत्रेण ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्च इत्येतद्द्वयं यस्य वर्णस्य येन वर्णेन समं तुल्यं तन्मिथः सवर्णसंज्ञं स्यादिति अर्थः फलितः। ततः 'अणुदित्सवर्णस्य चाप्रत्ययः' (पा.सू.१.१.६९) इति ग्रहणकसूत्रेण एकेन वर्णेन तस्य ये सवर्णाः तेषामपि ग्रहणं सम्पद्यते। तर्हि माहेश्वरसूत्रस्थितम् ऐऔजिति सूत्रमनावश्यकम्, एओङिति सूत्रेणैव ऐऔ इत्येतयोः ग्रहणात्। कथं ग्रहणम्? एदैतौ मिथः तथा ओदौतौ च मिथः सवर्णौ, ताल्वादिस्थानाभ्यान्तरप्रयत्नस्य समत्वात्। अनेन एकारेण ऐकारप्रपञ्चस्य तथा ओकारेण औकारप्रपञ्चस्य च ग्रहणमपि सम्भवम्। अतः ऐऔजिति सूत्रं व्यर्थम्। तथापि ऐऔजिति सूत्रारम्भसामर्थ्याद् एदैतोरोदौतोश्च न मिथः सावर्ण्यमिति विज्ञायते।

**ग)** 'अदर्शनं लोपः' (पा.सू.१.१.६०) इति सूत्रस्थितस्य अदर्शनपदस्य अर्थः श्रवणाभावः, न तु दर्शनाभावः। यतः इदं शब्दशास्त्रम्। शब्दः खलु श्रवणयोग्यः, न तु दर्शनयोग्यः। अत्र सूत्रे दृशधातुः ज्ञानसामान्यवाची। तदिह शब्दानुशासनप्रस्तावाच्छब्दविषयकं सत् श्रवणं सम्पद्यते। अतः अदर्शननाम अश्रवणम्। सूत्रेऽस्मिन् 'स्थानेऽन्तरतमः' (पा.सू.१.१.५०) इति सूत्रात्स्थाने इति पदमनुवर्त्य सूत्रार्थः कृतो दीक्षितेन- प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात्। श्रवणं तदैव सम्भवः यदा वक्ता उच्चारयति। अत्र श्रोतुः श्रवणस्य निषेधकृतः। न तु वक्तुः उच्चारणस्य। अर्थादुच्चारणे सत्यपि श्रवणं मा भूदिति। अनेन उच्चारणम् अनर्थकं स्याद्। यतः श्रावणाय वक्ता उच्चारयति। यदि श्रवणं न स्यात्तर्हि उच्चारणं अनर्थकं स्याद्। यतः सूत्रे श्रवणस्य निषेधः कृतः तत्सामर्थ्यात् श्रवणहेतुभूतमुच्चारणमपि निषिध्यते। तत्त्वबोधिन्यां प्राह- ''असति च श्रवणे उच्चारणमनर्थकमेवेति सामर्थ्याच्छ्रवणनिषेधे तद्धेतुभूतमुच्चारणमपि निषिद्धं भवतीति''[4] इति।

**घ)** 'तस्य लोपः' (पा.सू.१.३.९) इति सूत्रस्यार्थस्तु तस्य इतो लोपः स्यादिति। आदौ इत्संज्ञा ततः लोपः। हलन्त्यमिति सूत्रेण उपदेशे अन्त्यं यत् हल् तस्य इत्संज्ञा भवति। उपदेशाः खलु आदेशादयः। तर्हि 'एचोऽयवायावः' (पा.सू.६.१.७८) इति सूत्रे ये अयादयः आदेशाः सन्ति ते खलु उपदेशाः। अतो वकारयकारयोः इत्संज्ञा ततः लोपः करणीयः। परन्तु अत्र लोपो न भवति। यद्यत्र यवयोः लोपः स्यात्तर्हि

तयोः यवयोः सूत्रे अनुच्चारणमेव करणीयमासीत्, प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् इति न्यायाद्। सूत्रे यवयोः उच्चारणसामर्थ्यात्तयोः न लोपः। यतः लोपो न भवति ततः लोपहेतुभूता इत्संज्ञापि न भवति फलाभावात्।

**ङ)** संयोगे परे ह्रस्वं गुरुसंज्ञं स्यादिति 'संयोगे गुरु' (पा.सू.१.४.११) इति सूत्रार्थः। यथा— शिक्षधातुरिह शिक्षधात्ववयव इकारो गुरुसंज्ञकः संयोगात्प्राग्विद्यमानत्वात्। ननु 'भेत्ता' इति पदस्योपपत्तिः कथं सिद्ध्यति? यतो 'भिद् ता' इत्यवस्थायां लघूपधामवलोक्य 'पुगन्तलघूपधस्य चे'त्यनुशासनेन गुणो न प्राप्नोति, धात्ववयवघटकदकारप्रत्ययावयवघटकतकारयोरव्यवधानेन तयोः दकारतकारयोः 'हलोऽनन्तराः संयोगः' (पा. सू. १.१.७) इति संयोगसंज्ञायां संयोगपरत्वेन 'भिद् ता' इत्यत्र इकारस्य 'संयोगे गुरु' (पा.सू.१.४.११) इति गुरुसंज्ञायां लघूपधायाः अदर्शनात्। अत्र समाधीयते लघुशब्देन्दुशेखरकृता नागेशेन तदीये ग्रन्थे— 'भेत्ता इत्यादौ गुणस्य क्नोः कित्त्वसामर्थ्येन भूतपूर्वलघूपधग्रहणाद् बोध्यः'[5] इति। 'भिद्' इत्यत्र प्रत्ययविधानात्प्राक् यो लघूपधः तमुपधमाश्रित्य 'पुगन्तलघूपधस्य च' (पा. सू. ७.३.८६) इति सूत्रेण लघूपधगुणे 'भेत्ता' इति रूपमुपपन्नं भवति। अत्र मानं 'त्रसिगृधिधृषिक्षिपेः क्नुः' (पा.सू. ३.२.१४०) इति सूत्रस्थितस्य प्रत्ययस्य कित्करणम्। क्षिप्धातोः क्नुप्रत्यये क्षिप्नुः इत्यस्य सिद्धिः। क्नुप्रत्ययस्य कित्करणं कथं विहितमित्यत्रोत्तरं भवति 'क्ङिति च' इति गुणनिषेधाय। क्षिप्धात्ववयवपकारप्रत्ययावयवनकारयोः अव्यवधानेन तयोः संयोगसंज्ञायां संयोगपरत्वेन धात्ववयवेकारस्य गुरुसंज्ञायां लघूपधत्वाभावाद्गुणस्याप्राप्तेः कथमप्राप्तगुणस्य निषेधसम्भवः, प्राप्तेर्निषेधेति नियमसत्त्वात्। अतः लघूपधत्वाभावादेव गुणाप्राप्त्या कित्त्वस्य वैयर्थ्यं स्यात्। कित्करणसामर्थ्याद् भूतपूर्वलघूपधामाश्रित्य गुणस्य प्राप्तिरस्तीति बोध्यते। तद्वारणाय कित्करणम्।

**च)** 'अपवर्गे तृतीया' (पा. सू.२.३.६) इति सूत्रस्थितं तृतीयापदं ज्ञापकम्। सूत्रस्यार्थस्तु अपवर्गः फलप्राप्तिः, तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात्। तृतीया इति पदं किं ज्ञापयति? तृतीया इति पदम् 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति परिभाषां ज्ञापयति। कथं ज्ञायते तृतीयापदेन इयं परिभाषा ज्ञाप्यते? 'अपवर्गे तृतीया' इति सूत्रस्य व्यवहितपूर्वात् 'तृतीया च होश्छन्दसि' (पा. सू. २.३.३) इति सूत्रात् तृतीया इति पदस्य अनुवृत्तिः 'अपवर्गे तृतीया' इति सूत्रे सुलभा, यतोऽनुवृत्त्या एव तृतीयापदं सुलभं तथापि 'अपवर्गे तृतीया' इति सूत्रे तृतीयापदस्य ग्रहणं कृतं सूत्रकृता। अतः 'तृतीया' इति पदं व्यर्थम्। 'तृतीया' इति पदसामर्थ्यात् ज्ञापयति 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति परिभाषाम् इमाम्।

**छ)** 'साधकतमं करणम्' (पा. सू. १.४.४२) इति सूत्रस्यास्यार्थः क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञां स्यात्। अत्र सूत्रे तमग्रहणसामर्थ्यात् कारकप्रकरणे एतत्सूत्रादन्यत्र तरतमभावो नाश्रीयते इति नियमो ज्ञाप्यते। उच्यते तत्त्वबोधिन्याम्— "इतरस्तु कारकप्रकरणे गौणमुख्यन्याय एतत्सूत्रादन्यत्र न प्रवर्तते इति ज्ञापनाय तमब्ग्रहणम्"[6] इति। तमब्ग्रहणं केन प्रकारेण एतज्ज्ञाप्यते? 'साधकतमं करणमि'ति सूत्रे साधकपदं विद्यते तथा सूत्रस्यास्य कारकाधिकारादेव पुनः साधकं पदं लभ्यते अनेन साधकं साधकं प्रकृष्टसाधकमित्यर्थो लभ्यते। अनेन यः प्रकृष्टः साधकः सः करणसंज्ञां प्राप्नोति इत्यर्थः समायाति। तर्हि पुनः कथं प्रकर्षबोधाय प्रकर्षबोधकप्रत्ययस्य ग्रहणं क्रियते? प्रकर्षबोधकप्रत्ययस्य ग्रहणफलन्तु आधारोऽधिकरणमित्यत्रास्ति। 'आधारोऽधिकरणम्' (पा. सू. १.४.४५) इत्यत्र अधिक्रियते अस्मिन्निति अधिकरणमिति अन्वर्थसंज्ञया सिद्धे आधारपदे पुनः आधारपदग्रहणं तर्हि प्रकृष्टाधारं बोधयति। अतः

सर्वावयवव्याप्ताधारस्याधिकरणसंज्ञा स्यादिति 'तिलेषु तैलम्' 'सर्वस्मिन्नात्मा अस्ति' इत्यादौ एव अधिकरणसंज्ञा प्रसज्येत न तु गौणाधारे 'गङ्गायां घोष' इत्यत्र। किन्तु 'साधकतमं करणम्' (पा. सू. १.४.४२) इत्यत्र तमप्प्रत्ययस्य ग्रहणसामर्थ्यादस्मिन्कारकप्रकरणे प्रकर्षप्रत्ययं विना शब्दसामर्थगम्यार्थप्रकर्षो नाश्रीयते इति ज्ञाप्यते। प्रदीपे प्रदीयते— "तत्र तमश्रुतिरेतज्ज्ञापयति प्रकर्षप्रत्ययग्रहणमन्तरेणेह प्रकरणे साम्यर्थगम्यः प्रकर्षो नाश्रीयते"[7] इति। तेन साधकार्थमात्रबोधकं साधकपदं न प्रकृष्टोपकारकार्थपरम्, एवं आधारपदमपि सर्वावयवव्याप्त्या यो हि आधारो न तत्परं किन्तु गौणमुख्यसर्वविधाधारपदं तेन 'गङ्गायां घोष' इति गौणाधारस्याधिकरणसंज्ञा ततः सप्तमी सिद्धा।

**ज)** 'अधीगर्थदयेशां कर्मणि' (पा. सू. २.३.५२) इति सूत्रार्थः खलु एषां कर्मणि शेषे षष्ठी इति। अधीक् नाम स्मरणम्। अधीगर्थो नाम स्मरणार्थः। अधीति पदसामर्थ्याद् इक्धातुः अध्युपसर्गं न व्यभिचरति इति ज्ञापयति। अनेन कथं ज्ञायते यत् इक् धातुः अध्युपसर्गं न व्यभिचरति? स्मरणार्थकानां कर्मणि शेषे षष्ठी स्यादित्यर्थो विवक्षितश्चेत् स्मरणार्थे अधीगर्थ इति न कृत्वा स्मृत्यर्थदयेशां कर्मणि अथवा इगर्थदयेशां कर्मणि इति सूत्रन्यासः कर्तव्यः आसीत् यतो ह्यनेन लाघवोऽपि स्यात्। तदकृत्वा सूत्रकृता 'अधीगर्थदयेशां कर्मणि' इति सूत्रशरीरं कृतम्। एवमेव प्रकारेण ज्ञापयति अधिशब्दोच्चारणं ज्ञापकम्। तत्त्वबोधिन्यां कथितम्— "अधिशब्दोच्चारणम् इङिकावध्युपसर्गं न व्यभिचरतः इति ज्ञापनार्थम्। अन्यथा स्मृत्यर्थदयेशाम् इत्येव ब्रूयात् इगर्थे.. इति वा। इङंशे नेदं ज्ञापकमिति चेत्तर्हि णेरध्ययने वृत्तम् इत्यत्राधिशब्दोच्चारणमं ज्ञापकमस्तु"[8] इति।

**झ)** 'यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी' (पा. सू. २.३.९) इति सूत्रे 'यस्मादधिकम्' इति प्रयोगसामर्थ्यात् ज्ञापयति अधिकशब्दयोगे पञ्चमी स्यादिति। ज्ञापनमिदं विना अधिकशब्दयोगे पञ्चमी भवतीति नास्ति अन्यत् किञ्चन विधायकशास्त्रम्। अस्माज्ज्ञापनात् 'लोकाद् अधिको हरि' इति प्रयोगस्य साधुता। सिद्धान्तकौमुद्यां कथ्यते वृत्तिकृता— "अधिकशब्देन योगे सप्तमीपञ्चम्याविष्यते। तदस्मिन्नधिकम्... इति यस्मादधिकम्... इति च सूत्रनिर्देशात्"[9] इति।

**ञ)** "कृत्तद्धितसमासाश्च" (पा.सू. १.२.४६) इति प्रातिपदिकसंज्ञाविधायकमेकं सूत्रम्। अनेन सूत्रेण कृदन्तस्य तद्धितान्तस्य समासस्य च प्रातिपदिकसंज्ञा विधीयते। अत्र संशयः, कृत्प्रत्ययेन कृदन्तस्य तद्धितप्रत्ययेन तद्धितान्तस्य च या प्रातिपदिकसंज्ञा वृत्तौ वृत्तिकृता कथिता सा अयथार्था, संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्तीति परिभाषाबलात्। तर्हि कथं वृत्तिकृता संज्ञाविधौ कृदन्तस्य तद्धितान्तस्य च प्रातिपदिकसंज्ञा विहिता? अत्र समाधीयते अर्थवत् इत्यनुवर्तते, तत्समाथ्यात् तदन्तविधिः इति। "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" (पा.सू. १.२.४५) इति सूत्राद् अर्थवदिति पदमालोच्यसूत्रे अनुवर्तते। अर्थवदित्यस्यानुवृत्तिसामर्थ्यात् संज्ञाविधौ प्रत्ययस्यापि तदन्तमाश्रित्य कृदन्तस्य तद्धितान्तस्य चेति सूत्रार्थः सम्पद्यते। भाष्यकारेण "सुप्तिङन्तं पदम्"(पा. सू. १.४.१४) इति सूत्रभाष्ये भाषितम्- "अर्थवदिति वर्तते। कृत्तद्धितान्तं चैवार्थवन्न केवलाः कृतस्तद्धिता वा" इति।

केचन मन्यन्ते एतेषां निर्णयकानां मध्ये सामर्थ्यमेव मुख्यं शब्दार्थनिर्णयनिमित्तम्। यदि सामर्थ्यमेव एकं मुख्यं निर्णायकम् तर्हि संयोगादिकारिकायां हरिपरिगणिता किं व्यर्था? अत्र समाधीयते वैयाकरणसिद्धान्तलघुमञ्जूषायाः कलाटीकायां— 'मुख्यमित्यनेन गौणं तेषामपि सम्भवतीति न हरिविरोधः' इति। अर्थात् हरिपरिगणना न व्यर्था परन्तु सामर्थ्येतरे संयोगादयः गौणाः निर्णायकाः। संयोगादिना योऽर्थभेदः प्रतीयते सोऽपि सामर्थ्यसत्त्व एव न तु सामर्थ्याभावे इति सामर्थ्यमेव

तत्राप्यर्थभेदप्रत्ययनिमित्तम्, अर्थप्रकरणादिकं तु तत्र संनिहितमपि अन्यथासिद्धम्। यथा 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' (पा. सू. १.४.३७) इति सूत्रस्य दीक्षितवृत्तौ लिख्यते— 'द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्ते'[10] इति। तथा तत्सूत्रभाष्ये भाषितं— 'न ह्यकुपितो क्रुध्यति, न वाकुपितो द्रुह्यति, न वाकुपित ईर्ष्यति, न वाकुपितोऽसूयति'[11] इति। अनेन वुध्यते क्रोधादयः सर्वे कोपपूर्वकाः। तथा संयोगादयोऽपि सामर्थ्यप्रभवाः। सामर्थ्यपूर्वकं संयोगादीनां स्थितिः। मूलतः संयोगादयः सामर्थ्यस्यैव व्यञ्जकाः। पुण्यराजेन लिख्यते- 'तदत्र केचित् सामर्थ्यमेवैकं शब्दार्थनिर्णयनिमित्तमिति मन्यन्ते। योऽप्यर्थप्रकरणादिना तत्र भेदः समधिगम्यते, सोऽपि सामर्थ्यादेवात्र प्रतीयते इति कथयन्ति। सामर्थ्यमेव हि संसर्गादिभिर्व्यज्यत इति'[12] इति। नागेशेनापि कथितम्— 'अत्र सामर्थ्यमेवैकं निर्णायकं, संयोगादयस्तद्व्यञ्जकप्रपञ्चः, तैः सामर्थ्यस्यैवाभिव्यक्तेरिति परे'[13] इति।

## Endnotes

1. वाक्यपदीयम् (ब्रह्मकाण्डम्), सम्पा. वेदानन्दझा, पृ.४५७।
2. वाक्यपदीयम् (वाक्यकाण्डम्), सम्पा. पण्डितश्रीरघुनाथशर्मा, पृ.३८२।
3. वैयाकरणसिद्धान्तकौमुदी (द्वितीयभागः), सम्पा. गिरिधरशर्मा परेश्वरानन्दशर्मा, पृ.७।
4. वैयाकरणसिद्धान्तकौमुदी (प्रथमभागः), तदेव, पृ.६८।
5. लघुशब्देन्दुशेखरः, सम्पा. आचार्यब्रह्मदत्तद्विवेदी, पृ. १९८।
6. वैयाकरणसिद्धान्तकौमुदी (प्रथमभागः),तदेव, पृ.६३५।
7. महाभाष्यम् (द्वितीयभागः), सम्पा. पण्डितवेदव्रतवर्णी, पृ. ४०५।
8. वैयाकरणसिद्धान्तकौमुदी (प्रथमभागः), तदेव, पृ.६७७।
9. तदेव, पृ.७०२।
10. तदेव, पृ.६४८।
11. महाभाष्यम् (द्वितीयभागः), तदेव, पृ.४०३।
12. वाक्यपदीयम् (वाक्यकाण्डम्), तदेव,पृ.३८३।
13. वैयाकरणसिद्धान्तलघुमञ्जूषा (प्रथमभागः), सम्पा. आचार्यश्रीरामप्रसादत्रिपाठी, पृ.१८२।

## Bibliography


- नागेशभट्टः। वैयाकरणसिद्धान्तलघुमञ्जूषा (प्रथमो भागः)। सम्पा. आचार्यश्रीरामप्रसादत्रिपाठी, वाराणसी सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, २०१६।
- नागेशभट्टः। लघुशब्देन्दुशेखरः। सम्पा. आचार्यब्रह्मदत्तद्विवेदी। पटना सुशीलप्रकाशन, १९८८।
- पतञ्जलिः। महाभाष्यम् (द्वितीयभागः)। सम्पा. पण्डितवेदव्रतवर्णी। रोहतक हरयाणा साहित्य संस्थान, १९६३।
- भट्टोजिदीक्षितः। वैयाकरणसिद्धान्तकौमुदी (प्रथमभागः)। सम्पा. गिरिधरशर्मा परमेश्वरानन्दशर्मा। दिल्ली मोतीलाल बनारसीदास, २०१४।
- भट्टोजिदीक्षितः। वैयाकरणसिद्धान्तकौमुदी (द्वितीयभागः)। सम्पा. गिरिधरशर्मा परमेश्वरानन्दशर्मा। दिल्ली मोतीलाल बनारसीदास, २०१७।
- भर्तृहरिः। वाक्यपदीयम् (ब्रह्मकाण्डम्)। सम्पा. वेदानन्दझा। दिल्ली मन्दाकिनी संस्कृत विद्वत्परिषद्, २००२।
- भर्तृहरिः। वाक्यपदीयम् (वाक्यकाण्डम्)। सम्पा. पण्डितश्रीरघुनाथशर्मा। वाराणसी सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, २०१६।


—